# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. FOURTH SEMESTER EXAMINATION, MAY 2016**
**SECOND YEAR [BATCH 2014-17]**

Date : 24/05/2016 **SANSKRIT (General)**
Time : 11 am – 2 pm **Paper :** IV Full Marks : 75

1. यथेच्छं प्रश्न**द्वय**स्योत्तरं प्रदेयम्। [2×15]
   a) महाभारतस्य रचयिता क: ? अत्र कति पर्वाणि सन्ति ? समाजे साहित्ये च अस्य प्रभाव आलोच्यताम्।
   b) भाससमस्याविषये नातिदीर्घ: प्रबन्धो विरचनीय:।
   c) गद्यकविबाणभट्टविषये नातिदीर्घ: प्रबन्धो विरचनीय:।
   d) किं नाम गीतिकाव्यम् ? गीतिकाव्यविषये एको निबन्ध: समासेनोपस्थाप्यताम्।

2. यथाभिरुचि टीका**द्वयं** समाधेयम्। [2×5]
   मृच्छकटिकम्, कुमारसम्भवम्,दशकुमारचरितम्, श्रीमद्भगवद्गीता।

3. यथाभिमत**मेकस्य** प्रश्नस्योत्तरं देयम्। [1×10]
   a) ईशोपनिषत् कस्य वेदस्यान्तर्गता ? 'ईशोपनिषद्' इत्येवं नामकरणस्य तात्पर्यं किम् ? अस्या उपनिषदो नामान्तरमस्ति नास्ति वा ? यदि अस्ति तत्प्रदेयम्। अस्या उपनिषद: उपदेशा आलोचनीया:। [1+2+1+6]
   b) ईशोपनिषदि प्रतिपादितम् आत्मन: स्वरूपं विशद्यताम्।

4. a) **एका** व्याख्या करणीया। [1×5]
      i) यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
         सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।
      ii) अन्धं तम: प्रविशन्ति येऽविद्यामुपासते।
         ततो भूय इव ते तमो य उ विद्यायां रता:।

   **OR,**

   b) वङ्गभाषया आङ्गलभाषया वा यथेच्छं मन्त्र**स्यैक**स्यानुवाद: करणीय:। [1×5]
      i) असूर्या नाम ते लोका अन्धेन तमसावृता:।
         तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जना:।।
      ii) हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
         तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।।

5. यथारुचि प्रश्न**स्यैक**स्योत्तरं समाधेयम्। [10]
   a) नारदमुनेर्वचनानुसारं रामचरितं वर्ण्यताम्।
   b) बालकाण्डे रामराजत्वे विराजितसमृद्धेर्या वर्णना प्राप्यते सा विशद्यताम्।

6. आङ्गलभाषया वङ्गभाषया वा **एक**स्यानुवाद: कार्य:। [1×4]
   a) आत्मवान् को न जितक्रोधो द्युतिमान् कोऽनसूयक:।
      कस्य बिभ्यति देवाश्च ज्ञातरोषस्य संयुगे।।
   b) तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम च।
      स्नेहाद्विनयसम्पन्न: सुमित्रानन्दवर्धन:।।

7. a) **<u>एका</u>** व्याख्या कार्या। [1×6]

i) सीताप्यनुगता रामं शशिनं रोहिणी यथा।
पौरैरनुगतं दूरं पित्रा दशरथेन च।।

ii) अकर्दममिदं तीर्थं भरद्वाज निशामय।
रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा।।

**OR,**

b) यथेच्छं प्रश्न**<u>त्रित</u>**यस्य समाधानं कार्यम्। [3×2]

i) किं नाम रामायणस्य प्रशंसागीतम्?

ii) रामायणे वर्णितः आदिश्लोकः कः?

iii) क आसीत् आदिकविः?

iv) मारीचो रावणं किं समुपदिष्टवान्?

v) रामस्य वनवासगमनस्य कारणं किम्?

———— × ————